(1363) "रगे शङ्कायाम्" (I-भ्वादिः-785. अक. सेट्. पर.)

घटादिः ।

रागकः-गिका, रागकः-गिका, रिरगिषकः-षिका, रारगकः-गिका ; रगिता-त्री, रगयिता-त्री, रिरगिषिता-त्री, रारगिता-त्री ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककखतिवत् (141) बोध्यानि । अस्य धातोः घटादित्वात् 'मितां ह्रस्वः' (6-4-92) इति णौ परतः उपधाया ह्रस्वः । अतः ण्यन्ते रूपाणि सर्वाणि कखतिवत् (142) बोध्यानि ।

(1364) "रघि गत्यर्थः" (I-भ्वादिः-107. सक. सेट्. आत्म.)

रङ्घकः-ङ्घिका, रङ्घकः-ङ्घिका, रिरङ्घिषकः-षिका, रारङ्घकः-ङ्घिका ; रङ्घिता-त्री, रङ्घयिता-त्री, रिरङ्घिषिता-त्री, रारङ्घिता-त्री ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककङ्कतिवत् (140) बोध्यानि ।

(1365) "रघि भाषार्थः" (X-चुरादिः-1796. सक. सेट्. उभ.)

आस्वदीयः । '—भासार्थः' इति क्षीरस्वामी ।

रङ्घकः-ङ्घिका, रिरङ्घयिषकः-षिका ; रङ्घयिता-त्री, रिरङ्घयिषिता-त्री ; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिककण्ठयतिवत् (150) ज्ञेयानि ।

(1366) "रच प्रतियत्ने" (X-चुरादिः-1865. अक. सेट्. उभ.)

कथादिः, अदन्तश्च ।

'—कृत्याम्' इति वोपदेवः इति पा. धा. स. । '—कृञर्थे च इति द्रुमे' इति धा. का. (3-54) ।

[1]रचकः-चिका, रिरचयिषकः-षिका ; रचयिता-त्री, रिरचयिषिता-त्री ; इत्यादिकानि रूपाणि सर्वाण्यपि चौरादिककथयतिवत् (162) ज्ञेयानि । ल्यपि-[2]आरचय्य इति । क्तप्रत्यये—विरचितः । युचि-[3]रचना ।

---

1. धातोरस्यादन्तत्वेन अल्लोपस्य स्थानिवद्भावात् उपधावृद्धिः न भवति ।
2. ल्यपि, 'ल्यपि लघुपूर्वात्' (6-4-56) इति णेरयादेशे रूपमेवम् ।
3. 'ण्यासश्रन्थो युच्' (3-3-107) इति स्त्रियां युचि रूपमेवम् ।